# सिंहशृगालशिशुकथा

*मित्रभेद-मित्रसंप्राप्ति-काकोलूकीय-लब्धप्रणाश– अपरीक्षितकारकमिति पञ्चभि: भागै: 'पञ्चतन्त्रम्' नाम गद्यकाव्यमतीव लोकप्रियमस्ति । सुप्रख्यातकविना प्रचण्डपण्डितविष्णुशर्मणा विरचिते अस्मिन् ग्रन्थे मनुष्येतरचरित्रमवलम्ब्य बहव: नीतिपूर्णकथा: लिखिता: । तासु कथासु लब्धप्रणाशं नाम चतुर्थतन्त्रस्य पञ्चमी कथेयं सिंह-शृगालशिशु-कथा अन्यतमा।*

*शिशु:पालनीय: न तु वध्य: इति शिक्षां दातुं तथा सिंहशृगालशिशुचरित्रमाध्यमेन बालानां मनोरञ्जनार्थं कथेयं प्रदत्ता ।*

कस्मिंश्चिद् देशे सिंहदम्पती प्रतिवसत: स्म । अथ सिंही पुत्रद्वयमजीजनत्, सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति । अन्यस्मिन्नहनि तेन किमपि सत्त्वं नासादितम् । वने भ्रमतोऽपि तस्य रविरस्तं गत: । अथ तेन स्वगृहमागच्छता शृगालशिशु: प्राप्त: । तं च बालोऽयमिति अवधार्य यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमेव समर्पितवान् । तत: सिंह्याऽभिहितम्- ''भो कान्त ! त्वयानीतं किञ्चिदस्माकं भोजनम् ?'' सिंह आह– ''प्रिये ! मया अद्य एनं शृगालशिशुं परित्यज्य न किञ्चित् सत्त्वं समासादितम्, स च बालोऽयमिति मत्वा न व्यापादित: । इदानीं त्वमेनं भक्षयित्वा पथ्यं कुरु । प्रभातेऽन्यत् किञ्चित् उपार्जयिष्यामि।'' सा प्राह - ''भो कान्त ! त्वया बालोऽयं विचिन्त्य न हत: । तत् कथमेतमहं स्वोदरार्थे विनाशयामि । उक्तञ्च –

अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽपि संस्थिते ।
न च कृत्यं परित्याज्यं धर्म एष सनातन: ।।

तस्मान्ममायं तृतीय: पुत्रो भविष्यति ।'' इत्येवमुक्त्वा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत् । एवं ते त्रयोऽपि शिशव: परस्परं जातिविशेषमजानन्त: एकाचारविहारा बाल्यसमयं निर्वाहयन्ति स्म । अथ कदाचित् तत्र वने भ्रमन्नरण्यगज: समायात: । तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति यावत् प्रचलितौ तावत्तेन शृगालसुतेन अभिहितम् – ''अहो गजोऽयं युष्मत्कुलशत्रु: तन्न गन्तव्यमेतस्य अभिमुखम्।'' एवमुक्त्वा गृहं प्रधावित: । तावपि ज्येष्ठबान्धवस्य भङ्गात् निरुत्साहतां गतौ ।

अथ तौ द्वावपि गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतु:– यथा स गजं दृष्ट्वा दूरतोऽपि नष्ट: । सोऽपि तदाकर्ण्य कोपाविष्टमना: प्रस्फुरिताधर: ताम्रलोचन: तौ निर्भर्त्सयमान:परुषतरवचनानि उवाच । तत: सिंह्या एकान्ते नीत्वा असौ प्रबोधित: ''वत्स ! एवं कदाचित् मा जल्प । एतौ भवदीयलघुभ्रातरौ ।'' अथासौ प्रभूतकोपाविष्ट: तामुवाच – ''किमहमेताभ्यां शौर्येण रूपेण विद्याभ्यासेन कौशलेन वा हीनो येन मामुपहसत: । तन्मया अवश्यमेतौ व्यापादनीयौ ।'' तदाकर्ण्य सिंही तस्य जीवितमिच्छन्ती अन्तर्विहस्य प्राह–

''शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक ! ।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ।।''

''तत् सम्यक् शृणु । वत्स ! त्वं शृगालीसुत: । कृपया मया स्वस्तनक्षीरेण पुष्टिं नीत: । तद् यावत् एतौ मत्पुत्रौ शिशुत्वात् त्वां शृगालं न जानीत:, तावत् द्रुततरं गत्वा स्वजातीयानां मध्ये भव । नोचेदेताभ्यां हतो मृत्युपथं समेष्यसि ।'' सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमना: शनै: शनैरपसृत्य स्वजात्या मिलित: ।

## टिप्पणी :

सिंहदम्पती – ସିଂହ ଓ ସିଂହୀ । व्यापाद्य – ହତ୍ୟାକରି । सत्त्वम् – ଜୀବ । वने भ्रमतोऽपि तस्य – ସେ ବଣରେ ବୁଲୁବୁଲୁ । भ्रमतोऽपि तस्य – ଅନାଦରେ ୬ଷ୍ଠୀ । भ्रमत: – ଭ୍ରମ୍ + ଶତୃ । आसादितम् – ପ୍ରାପ୍ତ ହେଲା/ପାଇଲା । अवधार्य – ବିଚାରକରି / ଧାରଣା କରି / ଭାବି । दंष्ट्रामध्यगतं कृत्वा – ଦନ୍ତର ମଧ୍ୟରେ ରଖି । सिंह्यै – ସିଂହୀକୁ (ସଂପ୍ରଦାନେ ୪ର୍ଥୀ) । परित्यज्य – ଛାଡ଼ି / ବ୍ୟତୀତ । पथ्यम् – ଖାଦ୍ୟ / ପଥ୍ୟ । स्वोदरार्थे – ନିଜପେଟ ପାଇଁ । अकृत्यम् – ଅକାର୍ଯ୍ୟ । प्राणत्यागेऽपि संस्थिते – ପ୍ରାଣ ଗଲେ ବି (ଭାବେ ୭ମୀ) । कृत्यम् – କରଣୀୟ । स्वस्तनक्षीरेण – ନିଜସ୍ତନ୍ୟପାନ ଦ୍ୱାରା (କରଣେ ୩ୟା) । पुष्टिमनयत् – ବଢ଼ାଇଲା । अजानन्त: – ନ ଜାଣି । भ्रमन् – ବୁଲିବୁଲି । अरण्यगज: – ବଣୁଆ ହାତୀଟିଏ । अभिमुखम् – ସମ୍ମୁଖକୁ । अभिहितम् – କହିଲା। ज्येष्ठबान्धवभङ्गात् – ବଡ଼ଭାଇର ପଳାୟନ (ପୃଷ୍ଠଭଙ୍ଗ) ହେତୁ (ହେତୌ ୫ମୀ) । विहसन्तौ – ଦୁହେଁ ହସି ହସି । परुषतरवचनानि – କଟୁବଚନ । प्रबोधित: – ବୁଝାଇଲା । लघुभ्रातरौ – ସାନଭାଇ ଦୁହେଁ । शौर्येण – ବୀରତ୍ୱରେ । व्यापादनीयौ – ଦୁହେଁ ମରାଯିବାର ଯୋଗ୍ୟ। ମାରିଦେବି । आकर्ण्य – ଶୁଣି । जीवितमिच्छन्ती – ଜୀବନକୁ / ବଞ୍ଚିବାକୁ ଇଚ୍ଛା କରୁଥିବା । अन्तर्विहस्य – ମନେ ମନେ ହସି । कृतविद्य: – ଜ୍ଞାନୀ । दर्शनीय: – ସୁନ୍ଦର । उत्पन्न: – ଉତ୍ପନ୍ନ / ଜାତ ହୋଇଅଛ । हन्यते – ମରାଯାଏ ।

## अभ्यासः

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) शृगालशिशुं प्राप्य सिंहः किमकरोत् ?

(ख) भोजनविषये सिंहः सिंहीं किमुक्तवान् ?

(ग) कथं सिंही शृगालशिशुं न हतवती ?

(घ) कस्तावत् सनातनः धर्मः ?

(ङ) सिंही शृगालशिशुं कथं पालितवती ?

(च) त्रयोऽपि शिशवः कथं बाल्यसमयं निर्वाहयन्ति स्म ?

(छ) अरण्यगजं दृष्ट्वा शृगालशिशुः किमभिहितवान् ?

(ज) कथं सिंहसुतौ निरुत्साहतां गतौ ?

(झ) कथं शृगालशिशुः कोपाविष्टमनाः अभवत् ?

(ञ) कथं शृगालशिशुः परुषतरवचनानि उवाच ?

(ट) सिंही एकान्ते नीत्वा शृगालशिशुं किमुक्तवती ?

(ठ) प्रभूतकोपाविष्टः शृगालः सिंहीं किमुवाच ?

(ड) सिंही अन्तर्विहस्य किं प्राह ?

(ढ) कथं शृगालशिशुः स्वजात्या मिलितः ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) सिंहः नित्यं सिंह्यै किं ददाति ?

(ख) कदा रविरस्तं गतः ?

(ग) कथं सिंहः शृगालं जीवन्तमेव समर्पितवान् ?

(घ) कदा अकृत्यं नैव कर्त्तव्यम् ?

(ङ) त्रयोऽपि शिशवः कम् अजानन्तः एकाचारविहाराः बाल्यसमयं निर्वाहयन्ति स्म ?

(च) सिंहसुतौ गृहं प्राप्य पित्रोरग्रतः किम् अवदताम् ?

(छ) गजः कुत्र न हन्यते ?

(ज) शृगालशिशुः भयव्याकुलमनाः किम् अकरोत् ?

**3. बन्धनीमध्यात् रेखाङ्कितपदस्य कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) सिंहऽपि मृगान् व्यापाद्य सिंह्यै ददाति । (दानार्थे चतुर्थी, निमित्तार्थे चतुर्थो, निवेदनार्थे चतुर्थी)

(ख) तेन किमपि नासादितम् । (अनुक्ते कर्त्तरि तृतीया, करणे तृतीया, सहार्थे तृतीया)

(ग) वने भ्रमतोऽपि तस्य राविरस्तं गतः । (अनादरे षष्ठी, सम्बन्धविवक्षायां षष्ठी, सम्बन्धे षष्ठी)

(घ) त्वम् एनं भक्षयित्वा पथ्यं कुरु ।

(कर्मणि द्वितीया, प्रतिशब्दयोगे द्वितीया, क्रियाविशेषणे द्वितीया।)

(ङ) तेन शृगालसुतेन अभिहितम् ।

(अनुक्ते कर्त्तरि तृतीया, प्रयोजनार्थे तृतीया, प्रकृत्यादिभ्यः तृतीया)

(च) तौ पित्रोः अग्रतः ऊचतुः । (अग्रतः शब्दयोगे षष्ठी, सम्बन्धे षष्ठी, कृद्योगे षष्ठी)

(छ) किमहमेताभ्यां रूपेण हीनः ।

(ऊनार्थकशब्दयोगे तृतीया, अनुक्ते कर्त्तरि तृतीया, प्रयोजनार्थे तृतीया)

(ज) तत् मया अवश्यमेतौ व्यापादनीयौ । (सहार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया, हेतौ तृतीया)

(झ) गजः तत्र न हन्यते । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(ञ) कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः ।

(प्रकृत्यादिभ्यः तृतीया, हेतौ तृतीया, अनुक्ते कर्त्तरि तृतीया)

**4. वाक्यरचनां कुरुत ।**

अपि, ददाति, किञ्चित् , कदाचित्, तेन, हीनः, सम्यक्, कृपया, नोचेत्, स्वजात्या ।

**5. सन्धिविधानं कुरुत ।**

नित्यम् + एव , भ्रमतः + अपि, प्रभाते + अन्यत् , बालः + अयम् , सिंहः + आह, उक्तम् + च, धर्मः + एषः, मम + अयम्, अथ + असौ, माम् + उपहसतः, अवश्यम् + एतौ, निः + उत्साहताम्, अन्तः + विहस्य, त्वम् + उत्पन्नः, यावत् + मे, सः + अपि ।

**6. अधोलिखितपदानां सन्धिविच्छेदं कुरुत ।**

सिंहोऽपि, रविरस्तम्, अन्यस्मिन्नहनि, जीवन्तमेव, त्वयानीतम्, त्वमेनम्, त्रयोऽपि, नैव, भ्रमन्नरण्यगजः, द्वावपि, तावत्तेन, एवमुक्त्वा, तन्न, तावपि, पित्रोरग्रतः, दूरतोऽपि, मैवम्, तन्मया, तदाकर्ण्य, सुरोऽसि, गजस्तत्र, शनैरपसृत्य ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) पुत्रद्वयम् (पुत्राणां द्वयम्, पुत्रयोः द्वयम्, पुत्रेभ्यः द्वयम्) ।

(ख) शृगाल्याः शिशुः (शृगालीशिशुः, शृगालशिशुः, शृगालशिशुना) ।

(ग) दम्पती (द्वन्द्वः, कर्मधारयः, द्विगुः ) ।

(घ) प्राणत्यागे (प्राणस्य त्यागः तस्मिन्, प्राणानां त्यागः तस्मिन्, प्राणेभ्यः त्यागःतस्मिन्) ।

(ङ) माता च पिता च तयोः (पितुः, पित्रोः, पितृणाम्) ।

(च) मत्पुत्रौ (मम पुत्रौ, मदीयौ पुत्रौ, मह्यं पुत्रौ) ।

(छ) कोपेन आविष्टः (कोपाविष्टेन, कोपाविष्टः, कोपाविष्टस्य) ।

(ज) मृत्युपथम् (द्विगुः, कर्मधारयः, षष्ठीतत्पुरुषः) ।

(झ) अकृत्यम् (नास्ति कृत्यम्, न कृत्यम्, न एव कृत्यम्) ।

(ञ) विद्यायाः अभ्यासः तेन (विद्याभ्यासः, विद्याभ्यासेन, विद्याभ्यासस्य) ।

(ट) प्रस्फुरितः अधरःयस्य सः (बहुव्रीहिः, कर्मधारयः, द्विगुः) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) भ्रमतः = भ्रम् + _____ । (शतृ, ल्युट् , अनीय)

(ख) प्राप्तः = प्र + आप् + _____ । (क्तवतु, क्त, क्त्वा)

(ग) कृत्वा = _____ + क्त्वा । (कृ, कृत् , कृष् )

(घ) अभिहितम् = अभि + _____ + क्त । (हा, धा, दा)

(ङ) आनीतम् = आ + नी + _____ । (क्त, ल्यप्, क्तवतु)

(च) भोजनम् = _____ + ल्युट् । (भुज् , भोज् , भृज् )

(छ) मत्वा = _____ + क्त्वा । (मा, मन् , मृ)

(ज) त्यागः = त्यज् + _____ । (क्त, शतृ, घञ् )

(झ) हीनः = _____ + क्त । (धा, हा, स्था)

(ञ) नष्टः = _____ + क्त । (नश् , नस् , नम् )

(ट) उत्पन्नः = उत् + पद् + _____ । (क्त, ल्युट्, शानच् )

(ठ) हतः = _____ + क्त । (हा, धा, हन् )

(ड) अपसृत्य = अप + सृ + _____ । (क्त, ल्यप्, शतृ)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

सिंह, शृगाल, पुत्र, मृग, हत, तृतीय, इच्छत् ।

■